योक्तरि "आभिर्विश्वा अभियुजो विषूचीः" ऋ०६।२५,२।

**अभियोक्तव्य** त्रि० अभि+युज–तव्य। निषेध्ये "न स राज्ञाभियोक्तव्यः स्वकं संसाधयन् धनम्" मनुः। व्यवहारे यं प्रति अभियोगः कर्त्तुं शक्यते २ तस्मिन् प्रतिवादिनि अभिमुखं ३योजनीये च।

**अभियोक्तृ** त्रि० अभि+युज–तृच्। १व्यवहारे–अपराधयोजनकर्त्तरि वादिनि, स्त्रियां ङीप् "अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्"। "अभियोक्ता न चेत् ब्रूयाद्बध्यो दण्ड्यश्च धर्म्मतः" इति च मनुः २युद्धार्थमाक्रामिणि च।

**अभियोग** पु० अभि+युज–घञ्। अन्यकृतस्य निजधर्षणस्य नृपाय १विज्ञापने, (नालिश) अभियोगो द्विविधः"अभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः। शङ्काऽसतान्तु संसर्गात् तत्त्वं होढ़ाभिदर्शनात्" नारदोक्तेः। "अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्" या० २युद्धार्थमाक्रमे, ४शपथे, ५उद्योगे, ६आग्रहे "सन्तः स्वयं परहितेषु कृताभियोगाः नीति० ७अपचिकीर्षयाक्रमणे, "सम्प्रापदप्राप्तपराभियोगम्" कुमा० ८अभिनिवेशे "नयाभियोगं मनसः प्रसादं समापयस्वात्मगुणेन कामम्" रामा० ६अपचिकीर्षयानिरोधे। "क्षुभितं वनगोचराभियोगादिति" किरा०।

**अभियोगिन्** त्रि० अभि+युज–घिनुण्। १अभियोगकर्त्तरि वादिनि "मिथ्याभियोगी दण्ड्यःस्यात् विवादात् द्विगुणं दमम्" या०। २आक्रमकर्त्तरि, ३आग्रहयुक्ते, ४अभिनिविष्टे, ५योजनकर्त्तरि च।

**अभियोजन** न० भृशं योजनम्। योजितस्य दार्ढार्थं पुनर्योजने "अभियोजनं नाम युक्तस्य पुनर्योजनमिति" माध०।

**अभिरक्षण** न० अभितो रक्षणम्। मन्त्रादिना सर्व्वतः श्वेतसर्षपादिविक्षेपैः यातुधानादिभ्यो १ रक्षणे २ सर्व्वतो रक्षणे चाभावे अ। अभिरक्षाप्यत्र स्त्री। "प्रशान्तबाधं दिशतोऽभिरक्षया" किरा०।

**अभिरक्षित** त्रि० अभितोरक्षितः। सर्व्वतोरक्षिते।

**अभिरक्षितृ** त्रि० अभितोरक्षति तृच् स्त्रियां ङीप्। सर्व्वतो रक्षके "वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता" मनुः

**अभिरत** त्रि० अभिमुखतया भृशं वा रतः। १अत्यान्तासक्ते २अभिमुखतया रते च।

**अभिरति** स्त्री अभितो रतिः प्रा०स०। आसक्तौ "न मृगयाभिरतिर्न दुरोदरम्" रघुः। [मनोरमे।

**अभिरम्य** त्रि० अभिरमते भृशं रमतेऽत्र आधारे यत्।

**अभिराज्** त्रि० अभितो राजते अभि+राज+क्विप्। १ अधिकदीप्तिशीले २ अधीश्वरे च।

**अभिराद्ध** त्रि० अभि+राध–क्त। सेविते।

**अभिराम** पु० अभिरम्यतेऽस्मिन् रम+आधारे घञ्। १ सुन्दरे २ प्रिये, ३ मनोहरे च। "श्रोत्राभिरामाः ध्वनन्तौ रथनेमिस्वनोन्मुखैः" "श्रोत्राभिरामध्वनिना रथेन" "यस्यात्मगेहे नयनाभिरामः" इति च रघुः ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः शकु०। "राम इत्यभिरामेण वपुषा तस्य नोदितः" रघुः।

**अभिरुचि** पु० भृशा अत्यन्ता रुचिः प्रा०स०। १ अत्यन्तरुचौ

**अभिरूप** त्रि० अभिरूपयति सर्व्वं स्वात्मकं करोति चु०रूप–अच्। १ शिवे, २ विष्णौ च। अभिरूपयति निरूपयति। ३ पण्डिते। उत्कृष्टं रूपं यस्य। ४ कन्दर्पे, ५ चन्द्रे च। ६ मनोहरे त्रि०। "उत्कृष्टायाभिरूपाय वराय सदृशाय च" मनुः। "अभिरूपगुणभूयिष्ठा परिषत्" शकु० ७ अनुरूपे त्रि० "काममनभिरूपमस्या वयसो वल्कलम्" शकु०। अभिरूपस्य भावः मनोज्ञा० वुञ् आभिरूपकम् ष्यञ् आभिरूप्यञ्च सौन्दर्य्यादौ न०। "अर्चकस्य तपोयोगादर्चनस्यातिशायनात्। आभिरूप्याच्च विम्बानां देवः सान्निध्यमृच्छति" ति०त०पु०।

**अभिलक्ष्य** त्रि० अभिलक्ष्यते उद्दिश्यते अभि+लक्ष ण्यत्। १उद्देश्ये। लक्ष्यस्य शरव्यस्याभिमुख्यम् अव्ययी०। २शरव्याभिमुख्ये अव्य०। "शब्दं प्रतिगजप्रेषुरभिलक्ष्यमपातयम्" रघुः। ल्यप्। ३लक्ष्यीकृत्येत्यर्थे अव्य०।

**अभिलङ्घन** न० अभि+लघि–भावे ल्युट्। उल्लङ्घने। "त्वयाणामेव भूतानां सागरस्याभिलङ्घने" रामा०।

**अभिलषणीय** त्रि० अभि+लष–कर्म्मणि अनीयर्। काम्ये। एष्टव्ये। तव्य। अभिलषितव्योऽप्यत्र त्रि०।

**अभिलषित** त्रि० अभि+लष–कर्म्मणि क्त। १ इष्टे अभिलाषविषये। भावे क्त। २अभिलाषे इच्छायाम् न०।

**अभिलाप** पु० अभिलप्यते मनःसंकल्पोऽनेन। १ मनःसंकल्पावेदके अहमिदं करिष्ये इत्यादिरूपे वाक्ये "काम्ये हि कामाभिलापसहितकुशजलतिलत्यागरूपः सङ्कल्पः कार्य्य इति प्रा०त० प्रक्रमाधिकरणम्। २ आत्मीयज्ञानाकारोल्लेखिवाक्ये च यथा भूतलं घटाभाववदिति ज्ञानावेदकं घटोनास्तीति वाक्यं यथा च अयं घट इति ज्ञानोत्तरमनुव्यवसायात्मकज्ञानस्यावेदकं घटमहं जानामीति वाक्यम् "न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते तथाऽभिलाप-